ॐ हिर॑ण्यवर्णां॒ हरि॑णीं सु॒वर्ण॑रज॒तस्र॑जाम् ।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥१॥

oṁ hira̍ṇyavarṇā̱ṁ hari̍ṇīṁ suva̱rṇa ra̍jata̱-sra̍jām |
ca̱ndrāṁ hi̱raṇ-ma̍yīṁ la̱kṣmīṁ jāta̍vedo ma̱ āva̍ha || 1 ||

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म् ।

यस्यां॒ हिर॑ण्यं वि॒न्देयं॒ गामश्वं॒ पुरु॑षान॒हम् ॥२॥

tāṁ ma̱ āva̍ha̱ jāta̍-vedo la̱kṣmīm ana̍pagā̱minī̎m |
yasyā̱ṁ hira̍ṇyaṁ vi̱ndeya̱ṁ gāmaśva̱ṁ puru̍ṣān a̱ham || 2 ||

अ॒श्व॒पू॒र्वां र॑थम॒ध्यां ह॒स्तिना᳚द-प्र॒बोधि॑नीम् ।

श्रियं᳚ दे॒वीमुप॑ह्वये॒ श्रीर्मा᳚ दे॒वीर्जु॑षताम् ॥३॥

a̱śva̱-pū̱rvāṁ ra̍tha-ma̱dhyā̱ṁ ha̱sti-nā̎da pra̱bodhi̍nīm |
śrīya̍ṁ de̱vīm upa̍hvaye̱ śrīr-mā̎ de̱vī ju̍ṣatām || 3 ||

कां॒ सो॒स्मि॒तां हिर॑ण्यप्रा॒कारा॑मा॒र्द्रां ज्वल॑न्तीं तृ॒प्तां त॒र्पय॑न्तीम् ।

प॒द्मे॒ स्थि॒तां प॒द्मव॑र्णां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥४॥

kā̱ṁ sösmi̱tāṁ hira̍ṇya prā̱kārā̍m ā̱rdrāṁ jvala̍ntīṁ tṛ̱ptāṁ ta̱rpaya̍ntīm |
pa̱dme̱ sthi̱tāṁ pa̱dma-va̍rṇā̱ṁ tām i̱hopa̍hvaye̱ śrīyam || 4 ||

च॒न्द्रां प्र॑भा॒सां य॒शसा॒ ज्वल॑न्तीं॒ श्रियँ॑ लो॒के दे॒वजु॑ष्टामुदा॒राम् ।

तां प॒द्मिनी॑मीं॒ शर॑णम॒हं प्रप॑द्येऽल॒क्ष्मीर्मे॑ नश्यतां॒ त्वां वृ॑णे ॥५॥

c̱andrāṁ prȧbhā̱sāṁ ya̱śasā̱ jvalȧntī̱ṁ śriyȧṁ lo̱ke de̱va jụṣṭām udā̱rām |
tāṁ pa̱dminīmī̱ṁ śarȧṇam a̱haṁ prapȧdye'lakṣmīr mė naśyatā̱ṁ tvāṁ vṛ̇ṇe || 5 ||

आ॒दि॒त्यव॑र्णे॒ तप॒सोऽधि॑जा॒तो  वन॒स्पति॒स्तव॑ वृ॒क्षोऽथ बि॒ल्वः ।

तस्य॒ फला॑नि॒ तप॒सा नु॑दन्तु मा॒यान्त॑रा॒याश्च॑ बा॒ह्या अ॑ल॒क्ष्मीः ॥६॥

ā̱di̱tya vȧrṇe̱ tapa̱so'dhijā̱to vana̱spati̱s tavȧ vṛ̱kṣo'tha bi̱lvaḥ |
tasya̱ phalā̇ni̱ tapa̱sā nụdantu mā̱yāntȧrā̱ yāścȧ bā̱hyā ȧla̱kṣmīḥ || 6 ||

उपै॑तु॒ मां दे॑वस॒खः की॒र्तिश्च॒ मणि॑ना स॒ह ।

प्रा॒दु॒र्भू॒तोऽस्मि॑ राष्ट्रे॒ऽस्मिन् की॒र्तिमृ॑द्धिं द॒दातु॑ मे ॥७॥

upaitu̱ māṁ dėva-sa̱khaḥ kī̱rtiśca̱ maṇinā sa̱ha |
prā̱du̱rbhū̱to'smi rāṣṭre̱'smin kī̱rtim ṛ̱ddhiṁ da̱dātu me || 7 ||

क्षुत्पि॑पा॒साम॑लां ज्ये॒ष्ठाम॑ल॒क्ष्मीं ना॑शया॒म्यहम् ।

अभू॑ति॒मस॑मृद्धिं॒ च सर्वां॒ निर्णु॑द मे॒ गृहा॑त् ॥८॥

kṣut-pipā̱sāṁ mȧlāṁ jye̱ṣṭhām ȧla̱kṣmīṁ nȧśayā̱myaham |
abhū̇ti̱m asȧmṛddhi̱ṁ ca sarvā̱n nirṇụda me̱ gṛhā̇t || 8 ||

ग॒न्ध॒द्वा॒रां दु॑राध॒र्षां॒ नि॒त्यपु॑ष्टां करी॒षिणी॑म् ।

ई॒श्वरीग्ं॑ सर्व॑भूता॒नां॒ तामि॒होप॑ह्वये॒ श्रियम् ॥९॥

ga̱ndha̱-dvā̱rāṁ du̍rādha̱rṣā̱ṁ ni̱tya pu̍ṣṭāṁ karī̱ṣiṇī̎m |

ī̱śvarīgu̍ṁ sarva̍ bhūtā̱nā̱ṁ tām i̱hopa̍hvaye̱ śriyam || 9 ||

मन॑सः॒ काम॒माकू॑तिं वा॒चः स॒त्यम॑शीमहि ।

प॒शू॒नां रू॒पमन्न॑स्य॒ मयि॒ श्रीः श्र॑यतां॒ यश॑ः ॥१०॥

mana̍sa̱ḥ kāma̱m ākū̍tiṁ vā̱cas sa̱tyam a̍śīmahi |

pa̱śū̱nāguṁ rū̱pam-a̍nnasya̱ mayi̱ śrīś śra̍yatā̱ṁ yaśa̍ḥ || 10 ||

क॒र्दमे॑न प्र॑जाभू॒ता॒ म॒यि॒ सम्भ॑व क॒र्दम ।

श्रियं॑ वा॒सय॑ मे कु॒ले मा॒तरं॑ पद्म॒मालि॑नीम् ॥११॥

ka̱rdame̍na pra̍jā-bhū̱tā ma̱yi̱ saṁbha̍va ka̱rdama |

śriya̍ṁ vā̱saya̍ me ku̱le mā̱tara̍ṁ padma̱ māli̍nīm || 11 ||

आप॑ः सृ॒जन्तु॑ स्नि॒ग्धा॒नि॒ चि॒क्ली॒त वस॑ मे॒ गृहे ।

नि च॑ दे॒वीं मा॒तरं॒ श्रियं॑ वा॒सय॑ मे कु॒ले ॥१२॥

āpa̍s sṛ̱jantu̍ sni̱gdhā̱ni̱ ci̱klī̱ta va̍sa me̱ gṛhe |

nica̍ de̱vīṁ mā̱tara̱ggaś śriya̍ṁ vā̱saya̍ me ku̱le || 12 ||

आ॒र्द्रां पु॒ष्करि॑णीं पु॒ष्टिं॒ पि॒ङ्ग॒लां प॑द्ममा॒लिनीम् ।

च॒न्द्रां हि॒रण्म॑यीं ल॒क्ष्मीं जात॑वेदो म॒ आव॑ह ॥१३॥

a̱rdrāṁ pu̱ṣkari̍ṇīṁ pu̱ṣṭi̱ṁ su̱va̱rṇāṁ he̍ma mā̱linīm |

sū̱ryāṁ hi̱raṇmayīṁ lakṣmīṁ jāta̍vedo ma̱ āva̍ha || 13 ||

आ॒र्द्रां य॒ः करि॑णीं य॒ष्टिं॒ सु॒व॒र्णां हे॑ममा॒लिनीम् ।

सू॒र्यां हि॒रण्म॑यीं ल॒क्ष्मी॒ं जात॑वेदो म॒ आव॑ह ॥१४॥

a̱rdrāṁ ya̱ḥ kari̍ṇīṁ ya̱ṣṭiṁ pi̱ṅgalāṁ pa̍dma mā̱linīm |

ca̱ndrāṁ hi̱raṇma̍yīṁ lakṣmīṁ jāta̍vedo ma̱ āva̍ha || 14 ||

तां म॒ आव॑ह॒ जात॑वेदो ल॒क्ष्मीमन॑पगा॒मिनी᳚म् ।

यस्यां॒ हिर॑ण्यं॒ प्रभू॑तं॒ गावो॑ दा॒स्योऽश्वा᳚न्, वि॒न्देयं॒ पुरु॑षान॒हम् ॥१५॥

tāṁ ma̱ āva̍ha̱ jāta̍vedo la̱kṣmīm a̍napagā̱minī̎m |

yasyā̱ṁ hi̍raṇya̱ṁ prabhū̍ta̱ṁ gāvo̍ dā̱syo'śvā̎n vi̱ndeya̱ṁ puru̍ṣān a̱ham || 15 ||

यः शुचिः प्रयतोभूत्वा जुहुया◌दाज्यमन्वहम्।
सूक्तं पञ्चदशर्च च श्रीकामः सततं जपेत् ॥१६॥

yaś śuci̱ḥ praya̍to bhū̱tvā ju̱huyā̍d ājya̱m anva̍ham |

sūkta̍ṁ pa̱ñca da̍śarca̱ṁ ca śrī̱ kāma̍ sata̱taṁ ja̍pet || 16 ||

पद्मानने पद्मउरू पद्माक्षि पद्मसंभवे।
तन्मे भजसि पद्मक्षि येन सौख्यं लभाम्यहम्॥१७॥

padma̍-priye padmini padma̱-haste padmā̍laye padma-dalāya̍tākṣi |
viśva̍-priye̱ viṣṇu mano̍'nukū̱le tvat pā̍da pa̱dmam mayi̱ sannidhatsva || 17 ||